दीपखट्वातनुच्छायाछिन्नकेशनखादिकम् ।
अजमार्जाररेणुश्च हन्ति पुण्यं पुराकृतम् ॥”
इति कर्म्मलोचनः ॥
“अजरजः खररजस्तथा सम्मार्ज्जनीरजः ।
स्त्रियः पादरजो राजन् ! शक्रादपि हरेत् श्रियम्॥”
इति लक्ष्मीचरित्रम् ॥

धूलिका, स्त्री, ( धूलिरिव प्रतिकृतिः । “इवे प्रतिकृतौ ।” ५।३।९६ । इति कन् । टाप् । ) कुज्झटिका । इति शब्दरत्नावली ॥ ( नीहारः । यथा, नीहारे वाणशब्दे चेति इत्यत्र नीहारे धूलिकायामिति मनुटीकायां कुल्लुकभट्टः ॥ )

धूलिकेदारः, पुं, ( धूलिप्रधानः केदारः । इति मध्यलोपिसमासः । ) वप्रः । चेत्रम् । इति त्रिकाण्डशेषः ॥

धूलिगुच्छकः, पुं, ( धूलीनां गुच्छक इव । इवार्थे कन् । ) पटवासकः । फल्गुचूर्णम् । इति त्रिकाण्डशेषः ॥

धूलिध्वजः, पुं, ( धूलिरेव ध्वजो यस्य । ) पवनः । इति त्रिकाण्डशेषः ॥

धूलिपुष्पिका, स्त्री, ( धूलिः परागस्तत्प्रचुरं पुष्पं यस्याः । कापि अत इत्वम् । ) केतकी । इति राजनिर्घण्टः ॥

धूलीकदम्बः, पुं, ( धूलीनां कदम्बमत्र । ) नीपः । तिनिशः । वरुणवृक्षः । इति मेदिनी । बे, १७ ॥ ( धूलिसमूहे, क्ली ॥ )

धूलीकदम्बकः, पुं, ( धूलीकन्दम्ब+स्वार्थे कन् । ) नीपः । इति जटाधरः ॥

धूलीपटलः, पुं, ( धूलीनां पटलं यत्र । ) उड्डीयमानधूलीसमूहः । यथा, धूलीपटले धूमत्वभ्रमे तत्रासता धूमत्वेन । इत्यादि सामान्यलक्षणायां शिरोमणिः ॥ ( धूलीसमूहे, क्ली ॥ )

धूश, क कान्तिकृतौ । इति कविकल्पद्रुमः ॥ ( चुरा-परं-सकं-सेट । ) मध्यखरी । कान्तिकृतिः शोभितकरणम् । चन्दनो धूशयत्यङ्गम् । इति दुर्गादासः ॥

धूष, क धूषे । इति कविकल्पद्रुमः ॥ ( चुरां-परं-सकं-सेट् । ) वद्धखरी । धूषः कान्तिकृतिः । चन्दनो धूषयत्यङ्गम् । इति दुर्गादासः ॥

धूस, क धूषे । इति कविकल्पद्रुमः ॥ ( चुरां-परं-सकं-सेट् । ) वद्धखरी । धूषः कान्तिकृतिः । क, धूसयत्यङ्गं चन्दनः । महिषधूसरितः सरितस्तटमिति जानकीहरणयमकाद्दन्त्यान्त एवायमिति रमानाथः । स्वमते तालव्यमूर्द्धन्यान्तोऽप्ययम् । इति दुर्गादासः ॥

धूसरः, पुं, (धुनातीति । धू+“कृधूमदिभ्यः कित् ।” उणां ३ । ७३ । इति सरन् । स च कित् ।) ईषत्पाण्डुवर्णः । तद्वति, त्रि । इत्यमरः । १ । ५ । १३ ॥ (यथा, रघौ । ११ । ६० ।
“क्षेमपक्षिपरिधूसरालकाः
सान्ध्यमेघरुधिरार्द्रवाससः ॥” )
उष्ट्रः । गर्द्दभः । कपोतः । इति राजनिर्घण्टः ॥ तैलकारः । इति हेमचन्द्रः । ६ । २९ ॥ * ॥

धूसरवस्तूनि यथा । धूलिः १ लूता २ करभः ३ गृहगोधिका ४ कपोतः ५ धूषिकः ६ रङ्गम् ७ काककण्ठः ८ खरादिः ९ । इति कविकल्पलता ॥

धूसरच्छदा, स्त्री, ( धूसर ईषत् पाण्डुवर्णश्छदो यस्याः । ) श्वेतबुह्ना । इति रत्नमाला ॥

धूसरपत्रिका, स्त्री, ( धूसरं पत्रमस्याः । ङीप् । स्वार्थे कन् । टापि पूर्व्वह्रस्वः । ) हस्तिशुण्डीक्षुपः । इति राजनिर्घण्टः ॥

धूसरा, स्त्री, ( धूसर+टाप् । ) पाण्डुरफलीक्षुपः । इति राजनिर्घण्टः ॥

धूसरी, स्त्री, ( धूसर+ङीप् । ) किन्नरीभेदः । इति मेदिनी । रे, १७० ॥

धूस्तूरः, पुं, ( धूस् कान्तिकरणे+भावे क्विप् । तं तूर्य्यते हि स्तीति । तूर हिंसे+“इगुपधज्ञेति ।” ३ । १ । ३५ । इति कः । ) धूस्तूरवृक्षः । इत्यमरटीकायां भरतः ॥

धृ, क धृत्याम् । इति कविकल्पद्रुमः ॥ ( चुरां-परं-सकं-अनिट् । ) क, धारयति । इति दुर्गादासः ॥

धृ, ङ अवध्वंसे । इति कविकल्पद्रुमः ॥ ( भ्वां-आत्मं-अकं-अनिट् । ) अवध्वंसः पतनम् । ङ, धरते पत्रं वृक्षात् । गोविन्दभट्टस्तु अविध्वंसने इति पठित्वा विध्वंसनं ध्वंसनं तस्याभावोऽविध्वंसनं स्थापनमिति व्याख्याति । इति दुर्गादासः ॥

धृ, ङ श स्थितौ । धृतौ । इति कविकल्पद्रुमः ॥ ( तुदां-आत्मं-स्थितौ अकं-धृतौ सकं-अनिट् । ) ङ श, ध्रियते । इति दुर्गादासः ॥

धृ, ञ धृत्याम् । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-सकं-अनिट् ।) ञ, धरति धरते । इति दुर्गादासः ॥

धृज, गतौ । इति कविकल्पद्रुमः ॥ ( भ्वां-परं-सकं-सेट् । ) धर्ज्जति । इति दुर्गादासः ॥

धृज, इ गतौ । इति कविकल्पद्रुमः ॥ ( भ्वां-परं-सकं-सेट् । इदित् । ) सप्तमस्वरी । इ, धृञ्जति । इति दुर्गादासः ॥

धृतः, त्रि, धृधातोः कर्म्मणि कर्त्तरि च क्तप्रत्ययेन निष्पन्नः ॥ धारणविशिष्टः । धरा इति भाषा । ( यथा, महाभारते । १ । ७४ । १०३ ।
“अश्वमेधसहस्रञ्च सत्यञ्च तुलया धृतम् ।
अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते ॥”)
अवध्वस्तः । पतित इति यावत् । स्थितः । (स्थिरीकृतः । निश्चितः । यथा, महाभारते । ७ । १६ । २८ ।
“धृतां धनञ्जयवधे प्रतिज्ञाञ्चापि चक्रिरे ॥”
पुं, त्रयोदशमनो रौच्यस्य पुत्त्रविशेषः । यथा, हरिवंशे । ७ । ८२ ।
“चित्रसेनो विचित्रश्च नयो धर्म्मभृतो धृतः ।
सुनेत्रः चत्रवृद्धिश्च सुतपा निर्भयो दृढ़ः ।
रौच्यस्यैते मनोः पुत्त्रा अन्तरे तु त्रयोदशे ॥”
द्रुह्युवंशीयधर्म्मस्य पुत्त्रः । यथा, भागवते । ९ । २३ । १४ ।
“द्रुह्योश्च तनयो बभ्रुः सेतुस्तस्यात्मजस्ततः ।
आरब्धस्तस्य गान्धारस्तस्य धर्म्मस्ततो धृतः ॥”)

धृतराष्ट्रः, पुं, ( धृतं राष्ट्रं येन । ) दुर्य्योधनपिता । स जन्मान्धः शान्तनुपुत्त्रः विचित्रवीर्य्यक्षेत्रे व्यासाज्जातः । इति महाभारते । १ । ९५ । ५५ ॥ ( अयं हि गन्धर्व्वपतेर्हंसस्य अंशावतारः । यथा, महाभारते । १ । ६७ । ८४ ।
“अरिष्टायास्तु यः पुत्त्रो हंस इत्यभिविश्रुतः ।
स गन्धर्व्वपतिर्जज्ञे कुरुवंशविवर्द्धनः ॥” )
सुराजा । नागभेदः । इति मेदिनी । रे, २७१ ॥ ( यथा, महाभारते । २ । ९ । ९ ।
“कम्बलाश्वतरौ नागौ धृतराष्ट्रबलाहकौ ॥”)
पक्षिभेदः । इति विश्वहेमचन्द्रौ ॥ ( गन्धर्व्वविशेषः । यथा, विष्णुपुराणे । २ । १० । १५ ।
“ब्रह्मापेतोऽथ ऋतजित् धृतराष्ट्रोऽथ सप्तमः ॥”
बलिराजस्य पुत्त्रविशेषः । यथा, हरिवंशे । ३ । ७४ ।
“बलेः पुत्त्रशतञ्चासीद्बाणज्येष्ठं नराधिप ! ।
धृतराष्ट्रश्च सूर्य्यश्च चन्द्रमाश्चेन्द्रतापनः ॥”
जनमेजयस्य ज्येष्ठपुत्त्रः । यथा, महाभारते । १ । ९४ । ५४ ।
“जनमेजयस्य तनया भुवि ख्याता महाबलाः ।
धृतराष्ट्रः प्रथमजः पाण्डुर्व्वाह्लीक एव च ॥”)

धृतराष्ट्री, स्त्री, (धृतराष्ट्रस्य पत्नी । ङीष् ।) हंसपत्नी । इति मेदिनी । रे, २७२ ॥ (यथा, महाभारते । १ । ६६ । ५७, ५९ ।
“काकीं श्येनीं तथा भासीं धृतराष्ट्रीं तथा शुकीम् ।
ताम्रा तु सुषुवे देवी पञ्चैता लोकविश्रुताः ॥”
“धृतराष्ट्री तु हंसांश्च कलहंसांश्च सर्व्वशः ।
चक्रवाकांश्च भद्रं ते जनयामास सैव तु ॥”
हंसपदीलता । इति हेमचन्द्रः ॥)

धृतिः, पुं, ( ध्रियते इति । धृ+क्तिन् । अभिधानात् पुंस्त्वम् । ) इष्टिः । इति मेदिनी । ते, २९ ॥ ( विश्वेदेवविशेषः । यथा, महाभारते । १३ । ९१ । ३० ।
“बलं धृतिर्व्विपाप्मा च पुण्यकृत् पावनस्तथा ॥”
चन्द्रवंशीयनृपविशेषस्य विजयस्य पुत्त्रः । यथा, हरिवंशे । ३१ । ५५ ।
“विजयस्य धृतिः पुत्त्रस्तस्य पुत्त्रो धृतव्रतः ॥”
निमिवंशीयानामेकतमः । यथा, भागवते । ९ । १३ । २६ ।
“शुनकस्तत्सुतो जज्ञे वीतहव्यो धृतिस्ततः ॥”
यदुवंशीयबभ्रोः पुत्त्रः । इति विष्णुपुराणे । ४ । १२ । १५ । “रोमपादाद्बभ्रुः बभ्रोः पुत्त्रो धृतिः ॥” )

धृतिः, स्त्री, (धृ+क्तिन् ।) तुष्टिः । ( यथा, मनुः । ६ । ९२ ।
“धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्व्विद्या सत्यमक्रोधो दशकं धर्म्मलक्षणम् ॥”)
योगभेदः । धैर्य्यम् । ( यथा, वाजसनेयसंहितायाम् । ३४ । ३ ।